# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ७ | गुणा: – ७० |
| विषय: – स्वामिनारायणवेदान्त: ( J ) | (C.E.- 3.5.5 New ) | |
| दिनाङ्क: – १६/१०/२०१९ | सन्दर्भग्रन्थ: सत्सङ्गिजीवनम्,प्रकरम्-४ | समय: –३.०० त: ६.०० |

**प्रथमान्विति:**

**प्रश्न: १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** (१०)

(१) लोभात् किं किं प्रभवति ? यथाभाष्यं लिखत।

(२) लोभ: कामो रसास्वाद: स्नेहो मानश्च पञ्चम:।
अन्त: शत्रव एते हि दुर्जेया विदुषामपि॥
– इति श्लोकं हेतुटीकानुगुणं व्याख्यात।

(३) त्यागिनाम् अपरिग्रहं धर्मं यथाग्रन्थं परिचाययत।

**प्रश्न: २ कस्यचिद् एकस्य प्रश्नस्य समाधानं कुरुत ।** (१०)

(१) पञ्चविधविषयाणां जयोपायप्रकारं निरूपयत।

(२) लोभदोषपरिहाराय द्विषष्टितमे उक्तान् उपायान् विवृणुत।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ।** (१०)

(१) कामासक्ता: पुरुषा: कानि पापकर्माणि आचरन्ति ?

(२) कामदोषविजयाय कानि व्रतानि नियमानि वा आचरितव्यानि ?

(३) रसात् समुत्पद्यमानान् दोषान् लिखत।

**प्रश्न: ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेय:।** (१०)

(१) कामदोषेण आचरितानां पापानां प्रायश्चित्तकर्माणि यथाग्रन्थं स्पष्टयत।

(२) त्यागिभि: रसास्वादवर्जनाय कानि नियमानि व्रतानि वा अनुसर्तव्यानि ?

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** (१०)

(१) वासुदेवं तदीयांश्च विनान्यत्र तु यो भवेत्।
स्नेहः स हि महाञ्छत्रुर्भूरिदोषाकरोऽस्ति वै॥
- इति श्लोकं हेतुटीकानुगुणं व्याख्यात।

(२) मानेन समुत्पन्नान् दोषान् यथाग्रन्थमुपपादयत।

(३) मानमूलो महान्दोषः क्रोधाख्योऽत्र प्रवर्तते।
यो भस्मसात्करोत्याशु दानव्रततपोयमान्॥

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) स्नेहदोषजयोपायान् यथाग्रन्थं स्पष्टयत।

(२) मानदोषविजयाय त्यागिभिः गृहिभिश्च कानि व्रतानि नियमानि वा आरचितव्यानि ? स्पष्टयत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत।** (१०)

(१) त्यागिनाम् अरयः के सन्ति ?

(२) त्यागिनः प्रमुखाः पञ्च दोषाः के ?

(३) हेतुटीका केन विरचिता ?

(४) त्यागिनः परमो धर्मः कः ?

(५) सर्वदोषाणामाश्रयः कः ?

(६) गृहिणां गृहे त्यागिभिः कदा गन्तव्यः ?

(७) सर्वपातकनाशकं व्रतं किम् ?

(८) सर्वेषाम् इन्द्रियाणां क्षोभहेतुः कः ?

(९) गृहिगेहे कतिभिः साधुभिः भोजनाय गन्तव्यम् ?

(१०) पुनर्जन्महेतुः कः ?

(११) सत्सङ्गजीवनस्य चतुर्थप्रकरणस्य द्विषष्टितः आरभ्य षट्षष्टिपर्यन्ताध्यायानां किन्नामधेयम् ?

(१२) त्यागिना केनवत् क्षमावान् भवितव्यम् ?

(१३) त्यागिभिः केवनत् क्षमावान् भवितव्यम् ?

(१४) त्यागिभिः कदा कदा निद्रा न कर्तव्या ?

(१५) क्रोधः कस्मात् समुत्पद्यते ?

--००--